No. १०६४-घ

Title मंगलाष्टकम्

Author कालिदासः

Extent 2 Age

Subject स्तोत्रम् · सम्पूर्णम्

नं० १०६४ - घ
मंगलाष्टकम् (स्तोत्रम्)
पत्रे २ (सम्पूर्णम्)
कर्त्ता कालिदास:

नं० २०६८-घ
सङ्कल्पादि-काण्ड
२ पत्र
लो॰ नट सम्पूर्ण
ग्रन्थ - कालिदास:

मं.
१

ॐ श्रीगणेशाय नमः ॥ ॐ श्रीमत्पंकजविष्टरो हरिहरौ वायुर्महेंद्रोऽन
लः ॥ चंद्रो भास्करवित्तपालवरुणाः प्रेताधिपाद्या ग्रहाः ॥ प्रद्युम्नो नलकू
वरः सुरगजश्चिंतामणिः कौस्तुभः ॥ स्वामी शक्तिधरश्च लांगलधरः कु
र्वंतु नो मंगलं ॥ १ ॥ गंगा सिंधुः सरस्वती च यमुना गोदावरी नर्मदा ॥ कावे
री सरयूर्महेंद्रतनया चर्मण्वती देविका ॥ क्षिप्रा वेत्रवती महासुरनदी
ख्याता च या गंडकी ॥ पूर्णाः पुण्यजलैः समुद्रसहिताः कुर्वंतु नो मंगलं ॥ २
लक्ष्मीः कौस्तुभपारिजातकसुराधान्वंतरिश्चंद्रमा ॥ गावः कामदुघाः सु
रेश्वरगजो रंभादिदेवांगनाः ॥ अश्वः सप्तमुखो विषं हरिधनुः शंखोऽमृतं
चांबुधे ॥ रत्नानीह चतुर्दश प्रतिदिनं कुर्वंतु नो मंगलं ॥ गंगा गोमति गो १

पतिर्गणपतिगोविंदगोवर्धनौ ॥ गीतागोमयगोरजौगिरिसुतागंगा
धरोगोतमा ॥ गायत्रीगरुडोगदाधरगयागंभीरगोदावरी ॥ गंधर्वग्रह
गोपगोकुलजनाकुर्वंतुनोमंगलं ॥ ७ ॥ नेत्राणांत्रितयंशिवंपशुपते
रग्नित्रयंपावनं ॥ यत्तद्विष्णुपदत्रयंत्रिभुवनंख्यातंचरामत्रयं ॥ गंगा
वाहपथात्रयंसुविमलंवेदत्रयंब्राह्मणां ॥ संध्यानांत्रितयंद्विजेरवि
हितंकुर्वंतुनोमंगलं ॥ ८ ॥ गौरीश्रीकुलदेवताचसुभगाभूमिःप्रपू
र्णाशुभा ॥ सावित्रीचसरस्वतीचसुरभीसत्यव्रताऽरुंधती ॥ स्वाहा
जांबुवतीसहस्वभगिनीदुःखप्रविध्वंसिनी वेलाचांबुधयेसमानम
कराःकुर्वंतुनोमंगलं ॥ ९ ॥ वाल्मीकिःसनकःसनंदनमुनिर्व्यासोव

मं॰ २

सिष्ठोभृगुः॥ जावालीयमदग्नरामजनकोगार्गेयोगिरागौतमा॥ मान्धा-
तासनकोनरपृथुस्सगरोधन्यादिलीपोनलः॥ पुण्यात्माधर्मसुतोययाति
नहुषोकुर्वंतुनोमंगलं।७। अश्वत्थोवटचंदनतरुमंदारकल्पद्रु-
मौ।जंवूनिंवकदंवचूतसरलाहद्राक्षयेदीविणः॥ सर्वेतेफलमि
श्रितावनभुवोविभ्राजितारासिधो।रम्यंचैत्ररथंसनंदनवनंकुर्वंतु
नोमंगलं॥८॥ इत्येवंवरमंगलाष्टकमिदंपापौघविध्वंसनं॥ पुण्यं
संप्रतिकालिदासकविनाश्रीठप्रबंधिकृता।यःप्रातःस्मरणुयात्स-
मालिहितमतिर्हिविघ्ननविधिर्जायते।गंगासागरसंगमोद्भवफलंप्राप्नो-
त्यसौमानवः॥९॥ इतिश्रीकालिदासकृतंमंगलाष्टकंसंपूर्णम्